**6 SEM TDC SNS M 4**

**2016**

( May )

SANSKRIT

( Major )

Course : 604

**( Sanskrit Literature of Assam )**

*Full Marks* : 80
*Pass Marks* : 32

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

UNIT—I

**( Ketakīkāvyam, Taraṅga—I )**

1. Answer the following questions : 1×5=5

   (a) Who was केतकी?

   (b) Who wrote the *Ketakīkāvyam* (केतकीकाव्यम्)?

   (c) How many Chapters (तरङ्ग) are there in the *Ketakīkāvyam*?

DIBRU COLLEGE CENTRAL LIBRARY ESTD - 1963 DIBRUGARH

( Turn Over )

(d) Who was the poet of the Assamese poem, *Ketakī* (केतकी)?

(e) How many verses are there in the 1st Taraṅga of the *Ketakīkāvyam*?

**2.** Write in your own words the summary of the *Ketakīkāvyam*, Taraṅga I. 10

**3.** Translate into English *or* Assamese any *three* of the following verses : 5×3=15

(a) न प्राणिनो यत्र च नैव मानवा
देशे मरुप्रान्तरगेऽप्यनुर्ब्बरे।
प्रगाय सञ्जीवन गान माहितं
त्वया मरूद्यानमनिन्द्यसुन्दरम्॥

(b) दिव्यं सदानन्दमयं सनातनं
रूपातिगं यत्र गृहीत-विग्रहम्।
विराजते त्वं विहगाङ्गने, कथं
विहाय देशं ननु तं समागता॥

(c) सम्मोहिता केन विहङ्गि, हेतुना
सन्धीयते किं प्रति ते मनोगतिः।
कथं विलापाकुल मञ्जु-कुञ्जने-
रितस्ततो यासि न वेत्ति मानवः॥





(d) 'अभीप्सितं भोजनमत्र लप्स्यते'
विचारयन्त्येवमहो विहङ्गमे।
इहागता, त्वं बहुभिः प्रलोभनै-
र्नूनं मनस्ते खलु विप्रलप्स्यते॥

UNIT—II

**( Jayamatīkāvyam, Pravāha—III )**

**4.** Answer the following as directed : 1×4=4

(a) Who wrote the *Satī Jayamatīkāvyam*?

(b) The *Satī Jayamatī* is an Ākhyāyikā / Mahākāvya / Khaṇḍakāvya.
( Write only the correct word )

(c) What is the name of the other poetic composition of Bhavadeva Bhāgavatī?

(d) How many Pravāhas are there in the *Satī Jayamatīkāvyam*?

**5.** Translate into English *or* Assamese any *two* of the following : 5×2=10

(a) कुचक्रान्तजालं सचिवैरथाततम्
पतन्ति तस्मिन्नरपालसिंहकाः।
लोकेषु तस्माद्धनरत्ननाशक-
मशान्तिबीजं बहुधा समागतम्॥

(b) ततश्चुलिकूफा वयसा हि बालको
बभूव भूवः सचिवातिचेष्टया।
अपक्रमुर्द्धास्थिरबुद्धिविक्रमः
शशाक नैव क्रमितुं सुशासनै॥

(c) अतो निहन्मो जनभाविपालकान्
प्रयुज्य गुप्तान् खलु लोकघातकान्।
वधेन तेषां किल राज्यभागिना-
मरातिशून्यं भविता नृपासनम्॥

6. Explain with reference to the context any *one* of the following : 6

(a) समादधात्यत्र सुविज्ञपण्डितः
कुकार्य्यपूर्णाः खलु पापचारिणः।
तथापि तेषां प्रमदस्य कम्पने
क्षयस्य चित्रं सततं विराज्यते॥

(b) अयोग्यभूमौ वपनं कृषीवलः
करोति चेत्तत्र वृथा हि पौरुषम्।
कृतं हि तादृक् सचिवैः सुदुर्म्मदै-
र्द्धधाति कीदृक् कुफलं विलोक्यताम्॥

## UNIT—III

### ( Praśasti )

7. Answer the following questions : 1×3=3

(a) Who was the writer of the book 'स्तुतिप्रशास्तिमञ्जरी'?





(b) From which book the Praśasti of Mukunda Madhava Sarmah is taken?

(c) How many Ślokas are there in the प्रशास्ति of Śaṅkaradeva?

8. Write a note on Śaṅkaradeva as stated in your textbook, 'स्तुतिप्रशास्तिमञ्जरी'. 9

9. Translate into English *or* Assamese (any *two*) : 4×2=8

(a) श्रीश्रीशंकरदेवपादरजसा धन्या धरित्री स्वयं
धन्या साऽसमभारती सुललिता तेषां कवित्वाश्रिता।
धन्या वाढमहो स्वदेशमनुजास्सर्वेऽपि भक्त्यान्विताः
धन्यः सोऽपि गुरोर्य एव मधुरं स्तोत्रं पठत्यादरात्॥

(b) समीक्षा व्यञ्जना चैव संस्कृते वाङ्मये तव।
प्रपञ्च इति यो भाति सुहृदां चेतसि स्थितः॥
बहुशिष्यप्रशिष्येभ्यो येन विद्या प्रदीयते।
प्रज्ञाशीलस्य तस्यैव आयुर्वृद्धिः सदा भवेत्॥

(c) संस्कृतस्य समुद्राच्च रत्नमुद्धारितं त्वया।
मणिमरकटादीनामास्वादो जायते ध्रुवम्॥
असमीया जनेभ्यश्च स्वल्पकाले कृतं बहु।
कश्चिदेव प्रजायन्ते भवादृशो जना भुवि॥

## UNIT—IV

### ( Comprehension )

**10.** Read any *one* of the following passages and answer the questions given below in Sanskrit :

*(a)* एकस्मिन् वने एकः काक आसीत्। एकदा सः पिपासया आकुलः अभवत्। सः जलाशयम् अन्वेष्टुं वने इतस्ततः अभ्रमत्, किन्तु सुदूरं यावत् कुत्रापि कमपि जलाशयं न अपश्यत्। अन्ते सः एकं घटम् अलभत। तस्मिन् घटे स्वल्पं जलम् आसीत्। अतः सः जलं पातुम् असमर्थः अभवत्। अथ स एकम् उपायम् अचिन्तयत्। सः दूरात् पाषाणखण्डानि आनीय घटे अक्षिपत्। एवं क्रमेण जलम् उपरि समागच्छत्। स च काक जलं पीत्वा सुखम् अलभत। उद्यमस्य प्रभावेण काकः सफलः अभवत्। उद्यमस्य प्रभावेण एव सर्वे जीवने सफलाः भवन्ति। उक्तं च—"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।"

*(i)* काकः कुत्र आसीत्? 2

*(ii)* सः कया आकुलः अभवत्? 2

*(iii)* सः किं कर्तुम् असमर्थः अभवत्? 2

*(iv)* सः घटे कानि अक्षिपत्? 2

*(v)* कार्याणि केन सिद्ध्यन्ति? 2

*(b)* कस्मिंचिद् देशे कश्चिद् भूपतिः आसीत्। तस्य नाम मायादासः। अति लुब्ध सः दरिद्रः इव जीवितं नयति स्म।





एकदा कोऽपि मुनिः मायादासस्य प्रासादम् आगच्छत्। नृपतिः तं मुनिं सत्कारेणातोषयत्। नृपतिना सत्कृतः सन्तुष्टः मुनि अवदत्—"नृपते! स्वस्त्यस्तु ते। अभीष्टं वरं वरय" इति। मुनिनैवं उक्तः सः भूपतिः लोभेन प्रेरितः अवदत्—"मया स्पृश्यमानाः पदार्थाः सौवर्णाः भवन्तु" इति। "तथास्तु" इत्युक्त्वा मुनिः अन्तर्हितं अभवत्।

मुने वरं लब्ध्वा गृहं प्रविष्टः मायादासः। तत्र स्थितानि वस्तूनि अस्पृशत्। तेन स्पृष्टानि वस्तूनि सद्य एव सौवर्णानि जातानि।

तस्मिन् अवसरे राजकुमारी कुसुममञ्जरीमादाय तत्रागता। नृपतिः तां मञ्जरीं करेणास्पृशत्। तेन स्पृष्टा मञ्जरी सुवर्णमयी जाता। तद् दृष्ट्वा कुमारी दुःखिता अभवत्।

*(i)* मायादासः कीदृशः भूपतिः आसीत्? 2

*(ii)* मायादासेन सत्कृतः सन्तुष्टः मुनिः किमवदत्? 2

*(iii)* वरं लब्ध्वा मायादासः प्रथमं किमकरोत्? 2

*(iv)* मायादासेन स्पृष्टानि वस्तूनि कीदृशानि जातानि? 2

*(v)* मायादासेन स्पृष्टा मञ्जरी कीदृशी जाता? 2

★★★